# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. FIFTH SEMESTER EXAMINATION, DECEMBER 2016**

**THIRD YEAR [BATCH 2014-17]**

**SANSKRIT [Honours]**

Date : 15/12/2016

Time : 11 am – 3 pm

**Paper :** VI

Full Marks : 100

## [Use a separate Answer Book for each Group]

## Group - A

1. कस्यचि**देकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×10]

   क) पाठ्यांशानुसारं रुद्रदेवताचारित्रिकवैशिष्ट्यं समासेन उपस्थापनीयम्।

   ख) कस्मिन् वेदे भूमिसूक्तस्यान्तर्भाव: ? सूक्तेऽस्मिन् प्रतिपादितं भूमेर्माहात्म्यं समुपवर्ण्यताम्।

**OR,**

कयोश्चिद् **द्वयो:** मन्त्रयो: अनुवाद: करणीय आङ्गलभाषया वङ्गभाषया वा। [2×5]

क) यस्यामाप: परिचरा: समानीरहोरात्रे अप्रमादं क्षरन्ति।
सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा।।

ख) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञ: पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी न: कृणोतु।।

ग) यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवां गिरित्र तां कुरु मा हिंसी: पुरुषं जगत्।।

घ) विज्यं धनु: कपर्दिनो विशल्यो बाणवाँ उत।
अनेशन्नस्य या इषव आभुरस्य निषङ्गधि:।।

2. यथेच्छ**मेकस्य** प्रश्नस्योत्तरं प्रदेयम्। [1×10]

   क) शुन:शेपोपाख्यानं कस्मिन् ब्राह्मणे वर्तते ? तत्र वर्णित इन्द्ररोहितयो: कथोपकथनवृत्तान्त: समासेन लिख्यताम्। [1+9]

   ख) 'स एकया पृष्टो दशभि: प्रत्युवाच' — को जन: केन पृष्ट: ? पृच्छाविषय: क: ? किमासीदुत्तरम् ? [1+1+8]

**OR,**

कस्यचिदनुच्छेद**द्वयस्य** वङ्गभाषया आङ्गलभाषया वानुवाद: करणीय:। [2×5]

क) यावद्वै क्षुल्लका भवामो बह्वी वै नस्तावन्नाष्ट्रा भवत्युत मत्स्य एव मत्स्यं गिलति कुम्भ्यां माऽग्रे बिभरासि। स यदा तामतिव्वर्धाऽअथ कर्षूं खात्वा तस्यां मां बिभरासि।

ख) स होवाचापीपरं वै त्वा व्वृक्षे नावं प्रतिबध्नीष्व तं तु त्वा मा गिरौ सन्तमुदकमन्तश्छैत्सीद्यावद्यावदुदकं समवायात्तावत्ता-वदन्ववसर्पासीति स ह तावत्तावदेवान्ववससर्प्प तदप्येतदुत्तरस्य गिरेर्मनोरवसर्प्पणमित्यौघो ह ता: सर्व्वा: प्रजा निरुवाहाथेह मनुरेवैक: परिशिशिषे।

ग) तं होवाचाजनि वै ते पुत्रो यजस्व माऽनेनेति, स होवाच यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति निर्दशो न्वस्त्वथ त्वा यजा इति।

घ) कलि: शयानो भवति संजिहानस्तु द्वापर:।
उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चरंश्चरैवेति।।

3. कश्चि**देक:** प्रश्न: समाधेय:। [1×10]

   क) बृहदारण्यकोपनिषदि प्रतिपादित आत्मन उत्क्रान्त्युपाय: समुपवर्ण्यताम्।

   ख) ... आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्। —कथमस्मिन् सिद्धान्ते उपनयनम् ?

4. यथेच्छं **द्वयो:** वङ्गभाषया आङ्गलभाषया वानुवाद: करणीय:। [2×6]

   क) सा होवाच मैत्रेयी यन्नु म इयं भगो: सर्वा पृथिवी वित्तेन पूर्णा स्यात्, स्यां न्वहं तेनामृताहो नेति, नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति।

ख) सर्वं तं परादाद् योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदं सर्वं यदयमात्मा।

ग) स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति। न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः।

घ) तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति नैनं पाप्मा तरति सर्वं पाप्मानं तरति नैनं तपति सर्वं पाप्मानं तपति।

5. कश्चि**<u>देको</u>** मन्त्रः सप्रसङ्गं व्याख्येयः। [1×8]

क) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः।।

ख) येनाहं नामृता स्यां किमहं तेन कुर्याम्।

## <u>Group - B</u>

6. अधोदत्तयोः यथेच्छ**<u>मेकस्य</u>** प्रश्नस्योत्तरं लेख्यम्। [12]

क) याज्ञवल्क्यमतानुसारम् ऋणादाननीतयः सम्यक् सविशदमालोचनीयाः।

ख) को नाम दायः ? याज्ञवल्क्यमतानुसारं दायभागविधिः सम्यक् सविस्तरमालोचनीयः। [2+10]

7. कश्चि**<u>देकः</u>** श्लोकः सप्रसङ्गं व्याख्येयः। [1×7]

क) तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा।
चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः।।

ख) स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः।
अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः।।

8. यथेच्छं टीका**<u>द्वयं</u>** विरचनीयम्। [2×3]

क) प्राड्विवाकः ख) प्रतिभूः ग) आधिः घ) निधिः

9. यस्य कस्यचि**<u>देकस्य</u>** प्रश्नस्योत्तरं लेख्यम्। [1×10]

क) धर्मशास्त्रेतिहासे मनुसंहिताया गुरुत्वमालोचनीयम्।

ख) धर्मशास्त्रेतिहासे कात्यायनस्मृतेः अवदानं यथायथमालोचनीयम्।

10. यत्किमपि विषय**<u>त्रय</u>**मवलम्ब्य टीका विरचनीयाः। [3×5]

क) कुल्लूकभट्टः ख) रघुनन्दनः ग) जीमूतवाहनः

घ) मिताक्षरा ङ) गौतमधर्मसूत्रम् च) नारदस्मृतिः

—————— × ——————